3

# अनुच्छेदलेखनम्

**(श्रवण-भाषण-कौशल-विकासार्थम्)**

1. **जन्तुशाला**

   जन्तूनां शाला जन्तुशाला इति कथ्यते। जन्तुशालायाम् अनेके पशव: पक्षिण: च भवन्ति। जना: इमान् पक्षिण: पशून् च द्रष्टुम् दूरत: आगच्छन्ति। जन्तुशालाया: सर्वा: व्यवस्था: प्रशासनेन क्रियते। बालका: जन्तुशालां गत्वा प्रसन्ना: भवन्ति।

2. **स्वच्छता**

   स्वच्छता जीवने आवश्यकी भवति। सामान्यतया जना: स्वगृहं स्वच्छीकुर्वन्ति, परं मार्गस्य प्रतिवेशस्य च स्वच्छताया: विषये अवधानं न यच्छन्ति। अस्माकं प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपितु: गान्धिन: जन्मदिवसे स्वच्छताभियानस्य आरम्भं कृतवान्। अधुना बालका: अपि स्वच्छताविषये जागरूका: सन्ति। ते स्वगृहं विद्यालयं च यथाशक्ति स्वच्छं कर्तुं प्रयतन्ते।

3. **वृक्षो रक्षति रक्षित:**

   वृक्षा: जीवनस्य आधारा: भवन्ति। वृक्षै:, नदीभि:, पर्वतै: च सुशोभिता इयं प्रकृति: मानवानां कृते उपयोगिनी भवति। परं स्वार्थरता: मानवा: विकासं प्रति अन्धधावनशीला: निर्ममभावेन वृक्षान् कृन्तन्ति। अस्माभि: सर्वै: तथ्यमिदं ध्यातव्यं यत् यदा वयं वृक्षाणां रक्षणं करिष्याम: तदा वृक्षा: अस्माकं रक्षां करिष्यन्ति। वृक्षाणाम् अवदानविषये श्लोकोऽयं दर्शनीय: अपि—

   पत्रपुष्पफलच्छायामूलवल्कलदारुभि:।
   गन्धनिर्यासभस्मास्थितोक्यै: कामान् वितन्वते।।

4. **हीमादास:**

   हीमादास: असमराज्यस्य एकस्मिन् अतिनिर्धने कृषकपरिवारे जन्म अलभत। अस्या: जन्म जनवरीमासस्य नवम्यां तिथौ द्विसहस्रतमे (2000) वर्षे अभवत्। द्रारिद्र्यात् सुविधानाम् अभावे सा नियमितं प्रशिक्षणमपि न प्राप्नोत् तथापि सा हतोत्साहिता नाभवत्। आइ.ए.ए.एफ विंशतिवर्षेभ्य: निम्नवर्गे या धावनप्रतियोगिता अभवत् तस्यां



Workbook.indd 18 5/24/2019 3:49:38 PM

सा स्वर्णपदकं प्राप्य भारतवर्षं गौरवान्वितम् अकरोत्। वस्तुत: आदर्शरूपा प्रेरणास्वरूपा च सा सर्वस्मै युववर्गाय।

**5. सहिष्णुता**

वयं प्रतिदिनं समाचारेषु यातायातमार्गेषु वर्धमानां हिंसाम् अधिकृत्य समाचारान् शृणुम:। अतीव दु:खदायिनी एषा स्थिति: यत: अद्यत्वे जनेषु सहिष्णुताया: अभाव: जात:। वस्तुत: सहिष्णुताया: अभावे मानवस्य दुर्गति: एव भवति। समाजस्य विघटनस्य कारणमपि धार्मिक-सहिष्णुताया: अभाव: एवास्ति। यदि अस्माकं मनसि 'वयं सर्वे सदृशा: स्म:' इति भावना भवेत् तदा प्रकृत्या एव वयं सहनशीला: भविष्याम:। क्रोधं संयम्य उचितानुचितं विचार्य एव कोऽपि निर्णय: कर्तव्य:।

**6. संस्कृतशिक्षणम्**

प्राचीनकाले संस्कृतं व्यवहारस्य भाषासीत् परम् अधुना एषा तथा न दृश्यते मन्यते। संस्कृतभाषा जनभाषा भवेद् एतदर्थं'संस्कृतभारती' नामकं संस्थानं संस्कृतभाषाया: प्रचाराय प्रसाराय च प्रयतते। अत्र अनेका: परियोजना: प्रचाल्यन्ते यासु बालानां कृते वयस्कानां कृते च संस्कृतसम्भाषण-शिक्षणस्य रुचिकरी व्यवस्था क्रियते। 'वदतु संस्कृतम्', 'संस्कृतव्यवहार-साहस्री', 'भाषाप्रवेश:', 'गीतसंस्कृतम्', शिशुसंस्कृतम् इत्यादीनि अनेकानि बालोपयोगीनि पुस्तकानि अपि अनेन संस्थानेन प्रकाशितानि। सान्द्रमुद्रिका: ध्वनिमुद्रिका: अपि इत: प्राप्तुं शक्यन्ते। एवं संस्कृतभाषाधिग्रहणाय सर्वथा उपयुक्तमेतत् स्थानम्।

**7. मम धर्म:**

अहं मानव: अस्मि। मानवता मम गुण: धर्म: च। धर्मस्य दृष्ट्या अहं केवलं भारतीय: एव अस्मि। विस्तरेण यदि कथयामि तर्हि भारतीय-परम्परानुसारं धर्म: जीवनव्यवहार: भवति। एवं भ्रातृत्वं, पितृत्वं, शिक्षकत्वं, छात्रत्वं, सहयोगित्वं मित्रत्वञ्चादय: मे अनेके धर्मा:। एतै: सर्वै: धर्मै: उपेत: अहम् एक: भारतीय: एतदेव सत्यम्। भारतस्य उन्नत्यर्थं प्रयतिष्ये भारतीयां संस्कृतिम् च उन्नेष्यामि एष मम सङ्कल्प:।

**8. पुस्तकम्**

पुस्तकानि मानवस्य सर्वोत्तममित्राणि। कुपितं मित्रम् अस्माभि: सह कपटं कर्तुं शक्नोति परं पुस्तकानि सदैव अस्माकं कल्याणाय सज्जानि भवन्ति, अत: अस्माभि: एतादृशं हितकरं मित्रं कदापि न त्याज्यम्। प्रत्यक्षम् अप्रत्यक्षं सर्वविधं ज्ञानं पुस्तकै: प्राप्तुं शक्यते। अत एव कथितमपि— 'सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव स:।' अत: पुस्तकमेलकानि अपि भवन्ति यत्र वयं विविधविषयाणां पुस्तकानि एकस्मिन्नेव स्थाने प्राप्तुं क्षमा:, अत: अस्माभि: सदैव स्वाध्यायपरै: भवितव्यम्।



© NCERT not to be republished

**9. स्वाध्याय:**

विद्यालये पठितस्य पाठस्य यदा गृहे वयं पुन: अध्ययनं कुर्म: तद्विषये चिन्तनं कुर्म: अभ्यासं वा कुर्म: तत्कर्म 'स्वाध्याय' इति कथ्यते। अद्यत्वे छात्राणां मूलसमस्या स्वाध्यायस्य अभाव: अस्ति। विद्यालये पञ्च-षट्-होरापर्यन्तम् अध्यापकै: विविधविषयानवगत्य छात्र: गृहं प्राप्नोति तदा च अन्यशिक्षकेभ्य: व्यक्तिगतरूपेणापि पाठनस्य प्रबन्धं पितरौ कुरुत:। एवं छात्रेभ्योऽपि इदमेव प्रतीयते यद् वयं प्रात:कालात् आरभ्य सायं यावत् पठाम: एव, अत: अधुना मनोरञ्जनाय अन्यत् किमपि कर्तव्यम्। एवं स्वाध्यायस्य अभावे विषयस्तु हृदयङ्गम: एव न भवति अपितु परीक्षाचिन्ताकारणं सिध्यति अत: आवश्यकता तु इयमस्ति यत् पठितं विषयं प्रतिदिनं स्वाध्यायेन हृदयङ्गमं करणीयम्।

**10. मयूर:**

मयूर: अस्माकं राष्ट्रियपक्षी अस्ति। एष: मूलत: वन्यपक्षी अस्ति। बहुरङ्ग: मयूर: अतिसुन्दर: प्रतिभाति। वर्षाकालं वसन्तर्तुं च प्राप्य एष: सुन्दरम् आकर्षकञ्च नृत्यं करोति। एतस्य नृत्यं दृष्ट्वा केकारवञ्च श्रुत्वा जना: मुदिता: भवन्ति। भारतवत् म्याँमारस्य, श्रीलङ्कायाश्चापि राष्ट्रियपक्षी मयूर: अस्ति। देवानां सेनापते: कार्तिकेयस्य वाहनम् अपि मयूर: एवास्ति। मयूरपिच्छं विना श्रीकृष्णस्य शृङ्गार: अपूर्ण: मन्यते। अस्माभि: मयूरप्रजाति: रक्षणीया।

**11. आतङ्कवाद:**

हिंसात्मकक्रियाभि: स्वकीय-वर्चस्वस्थापनाय भयोत्पादनम् अथवा भयस्य वातावरण-निर्माणम् एव आतङ्कवाद: उच्यते। एष: केनापि एकेन जनेन समूहेन वा भवितुं शक्यते। अयम् असामाजिकतत्त्वै: असंवैधानिक-क्रियाभि: स्वकीयेच्छां पूरयितुं विभिन्नस्तरेषु सञ्चाल्यमान: भवति। अनेन सामान्यजीवनं सङ्कटापन्नं भवति। आतङ्कवादेन गृहे, समाजे, देशे, विदेशेषु च असुरक्षाया: भाव: भयञ्च उत्पद्यते। जनसम्मर्दे यत्र कुत्रापि, कदापि, किमपि भवितुं शक्यते। आतङ्कवादिसङ्घटनानां मुख्यं लक्ष्यं भयोत्पादनमेव। आतङ्कवादस्य समूलनाशाय सर्वेषां राष्ट्राणां सहयोग: परमावश्यक: अस्ति।

**1. अधोलिखितविषयानधिकृत्य पञ्चवाक्यात्मकमनुच्छेदं लिखत –**

(i) भूकम्पविभीषिका (ii) पर्वतारोहणम् (iii) पर्यावरणसंरक्षणम् (iv) गृहकार्यं कियत् उपयोगी? (v) मम जीवनलक्ष्यम् (vi) हास्योपचार: (vii) ग्राम्यजीवनम् (viii) जलसंरक्षणस्य उपाया: (ix) विद्यालयस्य उन्नत्यै छात्राणां सहयोग: (x) क्रीडाप्रतियोगिता।



© NCERT not to be republished



Workbook.indd 20 5/24/2019 3:49:39 PM